**केन्द्रीय विद्यालय विजयपुर**
**आदर्श प्रश्न पत्र (२०१९-२०)**

**विषय - संस्कृतं** **कक्षा - दशम**
**पूर्णांक: - ८०** **समय - त्रय: होरा**

**सूचना :**

- अक्षराणि शुद्धानि भवितव्यानि ।
- समुचितानि उत्तराणि लेखितव्यानि ।

*प्रश्न पत्रे चत्वारः खंडाः सन्ति ।
खण्ड–(क) अपठित अवबोधनम्
खण्ड–(ख) रचनात्मक कार्यम्
खण्ड–(ग) अनुप्रयुक्त व्याकरण
खण्ड–(घ) पठित अवबोधनम्
*सर्वे प्रश्नाः अनीवार्यः सन्ति
*प्रश्नसंख्यां अवश्यं लेखनीयम्

## खण्ड–क अपठित अवबोधनम्

**प्र.१] निम्नलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत ।**

जगति परोपकारः एव धर्मः । परोपकारः–प्रवृत्तो हि धर्मात्मा पुण्यात्मा च अस्ति । उत्तमाः पुरुषाः तु स्वार्थम् उपेक्ष्य अपि परहितसाधनतत्पराः भवन्ति । स्वोदरभरणरताः तु काककुक्करा एव सन्ति । वयं पश्यामः हि यत् प्रकृतिः अपि परहितसाधनपरा वर्तते । वृक्षाः परोपकारय एव सुस्वादुनि फलानि फलन्ति । नद्यः परोपकाराय एव शीतलं जलं वहन्ति । गावः तु परोपकाराय एव प्रकृत्या मधुरं पयः दुहन्ति । सर्वत्र एव प्रकृत्या परोपकारार्थं स्वशरीरंअर्पितं क्रियते । अत्रैव शरीरस्य साफल्यं अस्ति । परोमकाराय एव पादपः तीव्रतं सूर्यतापं स्वमूर्घ्न सहमानः स्वाश्रितेभ्यः पितिकेभ्यः छायां विस्तार्य सुखं वितरन्ति । यथा दिनकरः पद्माकरं विकासयति, निशाकरः कैरवकुलं विकासयति, मेघः जलं यच्छन्ति । परोपकारः एव शरीरस्य सत्यं भूषणमस्ति ।

प्रश्नाः–

**I)एकपदेन संस्कृत भाषायां उत्तरत ।** **[2x$\frac{1}{2}$=1]**

१) जगति कः धर्मः ?
२) परोपकारः शरीरस्य कीदृशं भूषणं अस्ति ?

**II) पूर्ण वाक्येन उत्तरत ।** **[2x1=2]**

१) स्वोदरभरणरताः मनुष्याः कीदृशाः भवन्ति ?
२) प्रकृतिः परोपकारार्थं किं करोति ?

**III)यथा निर्देशं उत्तरत ।** **[4x$\frac{1}{2}$=2]**

१) 'वहन्ति' पदस्य कर्तृपदं किं अस्ति ?
क) परोपकारः, ख) धर्मः, ग) दिनकरः, घ) नद्यः
२) 'शीतलं जलम्' अनयोः पदयोः किं विशेष्यपदं अस्ति ?
क) शीतलम्, ख) जलम्, ग) शीतलंजलम्, घ) नद्यः
३) 'दुष्टात्मा' पदस्य विलोमपदं लिखत ।
क) सूर्यतापम्, ख) पुण्यात्मा ग) उत्तमाः, घ)पद्माकरम्

४) 'तरवः' पदस्य समनार्थकपदं गद्यांशात् चित्वा लिखत ।

क) वृक्षाः,   ख) नद्यः,   ग) पुरुषाः,   घ) गावः

**प्र.२] भवती कृपा । मातुह् अस्वस्थाविषये लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखन्तु ।** **[$10x\frac{1}{2}=5$]**

छात्रवासः दिल्लीतः

तिथिः–

आदरणीयाः१)-------

सादरम्२)--------

अहं अत्र कुशलिनी । भवतः पत्रात् ३)-------- अस्वस्थाविषये ज्ञात्वा ४)------- अस्मि । आगामि मासे ५)------- परीक्षा भविष्यन्ति इति कारणात् गृहं आगन्तुं ६) -------- अस्मि । समये-समये मात्रे ७) -------- यच्छन्तु इति प्राथये । परीक्षायाः अनन्तरं ८) --------- गृहं आगमिष्यामि । ९)--------- मम प्रणामाः ।

भवदीय १०)-------

मञ्जूषा– | मातुः, पितृचरणाः, चिन्ताकुला, ओषधम्, अहम्, सुता, प्रणामाः, विद्यालये, मातृचरणयोः

**प्र.३] मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं आधृत्य पञ्चवाक्यानि संस्कृते लिखत ।** **[5x1=5]**




**अथवा**

**'दूरदर्शनम्' इति विषयं अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत ।**

मञ्जूषा– | आधुनिकयुगस्य, वर्तते, अभिन्नम्, अंगम्, मनोरञ्जनस्य, ज्ञानवर्धनस्य, दूरदर्शनम्, माध्यमः, सशक्तः, नाटकानि, चलनचित्राणि, धारावाहिकाः, समाचाराः आदयः, कार्यक्रमाः, शक्यन्ते, दूरदर्शनस्य पटे, उल्लसितं प्रसन्नम् च, भवति, मनः, नरस्य, घटिकाः घटनाः, दृष्ट्वा, रोमाञ्चितः, भवति, दूरदेशे अतिलोकप्रियम्, लाभप्रदम् यन्त्रम् ।

**प्र.४] निम्नलिखित संस्कृत वाक्यानां हिन्दी आङ्गलभाषायां वा अनुवादं कुरुत ।** **[5x1=5]**

१) एषः अग्निः किमर्थं ज्वलति ?

२) अनेके नराः उद्याने व्यायामं कुर्वन्ति ।

३) अद्य मम संस्कृत परीक्षा अस्ति ।

४) मम नाम -------- अस्ति ।

५) संस्कृत भाषा सरला सुलभा च अस्ति ।

## खण्ड–'ग' अनुप्रयुक्त व्याकरणम्

**प्र.५] अधोलिखितवाक्येषु रेखाङ्कितपादानां सन्धिं सन्धिविच्छेदं वा चित्वा लिखत ।** **[4x1=4]**

१) चक्रस्य **प्रत्येकम्** अरमपि उत्कीर्णम् ।

क) प्रति+कम्, ख) प्रत्य+एकम्, ग) प्रति+एकम्, घ) प्रति+ऐकम्

२) मञ्जूषायाः पदानि चित्वा **एकं+छेदं** लिखत ।

क) अनुछेदम्, ख) अनुच्छेदम्,, ग) अनूच्छेदम्, घ) अनुच्छेदं

३) **कस्तावत्** अस्य रचयिता ?

क) कस्+तावत्, ख) कः+तावत्, ग) कस्त+आवत्, घ) को+तावत्

४) अत्र **तप+वने** सर्वे मिलित्वा वसन्ति ।

तपवने, ख) तपोवने, ग) तपस्वने घ) तपौवने

**प्र.६] अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत ।** **[4x1=4]**

१) अस्मिन् संसारे कौ पूज्यौ ? नूनमेव **पितरौ** ।

क) माता च पिता च, ख) माता पिता, ग) पिता च पितरौ, घ) मातृ च पितृ च

२) दानवीरः कर्णः **दिनं दिनं प्रति** दानं करोति स्म ।

क) प्रतिदिनः, ख) प्रतिदिनम्, ग) प्रतिदिन, घ) दिनदिनम्

३) अहम् **आम्रवृक्षे** स्थित्वा पञ्चमस्वरेण गायामि ।

क) आम्रस्य वृक्षे, ख) आम्राणां वृक्षे, ग) आम्रम् वृक्षे, घ) आम्रे वृक्षे

४) **पाप एव कर्म यस्य सः तेन** द्रौणिना मे पुत्राः हताः ।

क) पापकर्मी, ख) पापकर्म, ग) पापकर्मणा, घ) पापी

**प्र.७] अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभाज्य वा समुचितं उत्तरं विकल्पेभ्यः चित्वा वाक्यानि लिखत ।** **[4x1=4]**

१) तौ मार्गे **क्रीडतः** बालकान् अवदताम् ।

क) क्रीड्+शतृ ख) क्रीड्+अत्, ग) क्रीड्+क्त, घ) क्रीड्+शत्

२) सज्जनानां वाचि **मधुर्+तल्** एव वर्तते ।

क) मधुरतल्, ख) मधुरता, ग) मधुरत, घ) मधुरताल्

३) सुवर्णकलशं **लभ्+शानच्** सः प्रसन्नः अभवत् ।

क) लभमानं, ख) लभमान्, ग) लभ्मानाः, घ) लभमानः

४) सः शनैः शनैः प्रभूतं धनं (**अज्+क्तवतु) ।**

क) अर्जवत्, ख) अजर्वान्, ग) अर्जितवती, घ) अर्जितवान

**प्र.८] अधोलिखितवार्तालापे रिक्तस्थानानि पूरयित्वा लिखत । [3x1=3]**

लता–किं त्वं पत्रं लिखसि ? मेधा– आम्, १) ---------पत्रं लिख्यते ।

क) मया ख) अस्माभिनः, ग) अहम्, घ) तव

लता–किं त्वं फलानि खादसि ? मेध–आम्, मया फलानि २) ------- ।

क) खाद्यते, ख) खाद्यन्ते, ग) खादन्ति, घ) खादति

लता–किम् छायाकारैः चित्राणि रच्यन्ते ? मेधा–आम्, छायाचित्रकाराः छायाचित्राणि ३)-------

क) रचयति, ख) रचयन्ति, ग) रच्यन्ते, घ) रच्यते

**प्र.९] अधोलिखितसारिण्यां अङ्कानां स्थाने संस्कृतपदेषु समयं लिखत ।** **[$4x\frac{1}{2}=2$]**

१) महिमा प्रातः ------- वादने उत्तिष्ठति । (5:15)

२) सा ------- वादने भ्रमणाय गच्छति । (5:30)

३) सा ------ वादने स्नानं करोति । (5:45)

४) सा ------ वादने ईशवन्दनां करोति । (6:00)

**प्र.१०] प्रदत्तविकल्पेभ्यः उचितं अव्ययपदं चित्वा रिक्तस्थानानि पूरयत । [4x1=4]**

१) "सतां आचारः सदाचारः" ------- उच्यते ।

क) च, ख) इति, ग) वा, घ) मा

२) वाल्मीकिना ------- प्रोक्तं रामोपाख्यानं उत्तमम् ।

क) यत्, ख) चेत्, ग) यतः, घ) यत्र

३) सः बुभुक्षिताय भोजनं ------- न ददाति ?

क) बहिः, ख) इति, ग) यत्र, घ) किमर्थम्

४) ----- मम विद्यालये वादविवादप्रतियोगिता आसीत् ।

क) श्वः, ख) सम्प्रति, ग) ह्यः, घ) यत्र

**प्र.११] अधोलिखितवाक्येषु रेखाङ्कितं पदं अशुद्धं अस्ति । प्रदत्तविकल्पेषु शुद्धं उत्तरं चित्वा वाक्यं पुनः लिखत । [4x1=4]**

१) **गुरुः** प्रसन्नं कृत्वा विद्यां अधिगच्छ ।

क) गुरुम्, ख) गुरवे, ग) गुरोः, घ) गुरु

२) धर्मस्थापनाय महापुरुषाः संसारे **आगच्छति ।**

क) आगच्छतम्, ख) आगच्छन्ति, ग) आगच्छाताम्, घ) आगच्छत्

३) विद्यया एव ------- **सर्वासाम्** जीवानां कल्याणं भवति ।

क) सर्वाणि, ख) सर्वाः, ग) सर्वेषाम्, घ) सर्वे

४) स्थितप्रज्ञः कामान् त्यागं <u>**कुर्वन्ति**</u> ।

क) करोमि, ख) कुर्वतः, ग) कुरु, घ) करोति

## खण्ड–'घ' पठित–अवबोधनम्

**प्र.१२] अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत् । अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत । सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः बहुवारं यत्नमकरोत् । तथापि वृषः नोत्थितः ।

प्रश्नाः–

**I) एकपदेन उत्तरत ।** **[2x1=2]**

१) कः क्षेत्रे पपात ?

२) क्षेत्रकर्षणं कः अकरोत् ?

**II) पूर्णवाक्येन उत्तरत । (केवल एकम्)** **[1x2=2]**

१) क्रुद्धः कृषिवलः किम् अकरोत् ?

२) तयोः बलीवर्दयोः एकः बलीवर्दः कथमासीत् ?

**III) निर्देशानुसारं उचितं उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत ।** **[$4x\frac{1}{2}=2$]**

१) 'तीव्रगत्या' इत्यर्थे किम् पदम् प्रयुक्तम् ?

क) तोदनेन, ख) नुद्यमानः, ग) अशक्तः, घ) जवेन

२) 'कृषकः' इति पदस्य विशेषण पदं किम् ?

क) कश्चित्, ख)क्रुद्ध, ग) एकः, घ) अतः

३) 'उत्थितः' इति क्रियापदस्य कतृपदं किम् ?

क) तथा, ख) वृषः, ग) अपि, घ) तथापि

४) 'तं दुर्बलं-----।' अत्र 'तं' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

क) कृषकाय, ख) वृषभाय, ग) कृषकः, घ) बलीवर्दः

**प्र.१३] निम्नलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत ।**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,

बली बलं वेत्ति न वेत्ति निर्बलः ।

पिको वसन्तस्य गुणं न वायसः,

करी च सिंहस्य बलं न मूषकः ॥

प्रश्नाः–

**I) एकपदेन उत्तरत ।** **[2x1=2]**

१) निर्गुणः किम् नवेत्ति ?

२) वसन्तस्य गुणः कः वेत्ति ?

**II)पूर्णवाक्येन उत्तरत ।(केवल एकम्)** **[1x2=2]**

१) सिंहस्य बलं कः वेत्ति ?

२) करी कस्य बलं, न कस्य बलम् ?

**III)प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत ।** **[$4x\frac{1}{2}=2$]**

१) 'काक' इति पदस्य समानार्थकं पदं किम् ?

क) मूषकः, ख) करी, ग) वायसः, घ) पिकः

२) 'बली' इति पदस्य विलोम पदं किम् ?

क) निर्बलः, ख) निर्गुणः, ग) करी, घ) बलम्

३) 'गुणी गुणं वेत्ति' अत्र कर्तृपदं किम् ?

क) गुणम्, ख) गुणी, ग) वेत्ति, घ) किमपि न

४) 'सिंहस्य बलं वेत्ति'----------- अत्र रिक्तपूर्तिः कुरुत ।

क) करी, ख) च, ग) मूषकः, घ) वायसः

**प्र.१४] निम्नलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत ।**

रामः–अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि ।

लवः–न हि जानाम्यस्य नामधेयम् । न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति ।

रामः– अहो माहात्म्यम् ।

कुशः– जानाम्यहं तस्य नामधेयम् ।

रामः– कथ्यताम् ।

कुशः– निरनुकोशो नाम -----

रामः– वयस्य, अपूर्वं खलु नामधेयम् ।

विदूषकः– (विचिन्त्य) एवं तावत् पृच्छामि निरनुक्रोश इति क एवं भणति ?

कुशः– अम्बा ।

विदूषकः– किं कुपिता एवं भणति, उत प्रकृतिस्था ?

प्रश्नाः–

**I) एकपदेन उत्तरत ।** **[2x1=2]**

१) रामः कयोः नाम वेदितुं इच्छति ?

२) कुशः स्वजनकस्य किं नाम वदति ?

**II) पूर्णवाक्येन उत्तरत । (केवल एकम्)** **[1x2=2]**

१) तपोवने कश्चिदपि कस्य नाम न व्यवहरति ?

२) विदूषकः विचिन्त्य किं पुच्छति ?

**III) प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत ।** **[4x$\frac{1}{2}$=2]**

१) 'भणति' इति क्रियापदस्य कर्तृपदं किम् ?

क) निरनुक्रोश, ख) विदूषकः, ग) कः, घ) एवम्

२) 'शत्रु' इति पदस्य विपरीतार्थकं पदं किम् ?

क) वयस्य, ख) अम्बा, ग) अपूर्वम्, घ) प्रकृतिस्था

३) 'अथवा' इत्यार्थे किं पदं प्रयुक्तम् ?

क) एवम्, ख) उत, ग) इति, घ) खलु

४) 'न हि जानाम्यस्य नामधेयम्' अत्र 'अस्य' सर्वनामपदं कस्मै प्रयुक्तम् ?

क) जनकम्, ख) रामाय, ग) लवाय, घ) जनकाय

**प्र.१५] अधोलिखितं वाक्येषु रेखाङ्कितपदं आधृत्य प्रश्ननिर्माणं कुरुत ।** **[5x1=5]**

१) <u>**सुराधिपः**</u> ताम् अपृच्छत् ।

२) <u>**सहस्त्राधिकेषु**</u> पुत्रेषु सत्स्वपि सा दुःखी आसीत् ।

३) <u>**शरीरस्य**</u> आयासजननं कर्म व्यायामः इति कथ्यते ।

४) त्वं <u>**मनुषात्**</u> बिभेषि ।

५) उद्याने <u>**पक्षिणाम्**</u> कलरवं चेतः प्रसादयति ।

**प्र.१६] अधोलिखितयोः श्लोकयोः अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत ।** **[8x$\frac{1}{2}$=4]**

क) व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम् ।

विदग्धमविदगधं वा निर्दोषं परिपच्यते ॥

अन्वयः-नित्यं ------कुर्वतो ------भोजनम् ।

अपि --------अविदगधं वा -------परिपच्यते ॥

| |
|---|
| विरुद्धमपि , व्यायाम, निर्दोषं, विदग्धम् |

ख) यदि पुत्रसहस्त्रं मे, सर्वत्र सममेव मे ।

दीनस्य तु सतः शक्रः ! पुत्रस्याभ्याधिका कृपा ॥

अन्वयः-यदि------ पुत्रसहस्त्रं, सर्वत्र मे ------- एव । ------ दीनस्य ------- सतः तु अभ्यधिका कृपा ॥

| |
|---|
| पुत्रस्य, मे, शक्रः, समम् |

**प्र.१७] अधोलिखितानि वाक्यानि घटनानुक्रमेण पुनः लेखनीयानि ।** **[8x$\frac{1}{2}$=4]**

१) "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ?"
२) तत्र राजसिंहः नाम राजपुत्रस्य भार्या पुत्रद्वयोपेता पितुर्गृहं प्रति चलति ।
३) मार्गे गहनकानने सा एकं व्याघ्रं ददर्श ।
४)इयं काचित् व्याघ्रमारी इति मत्वा व्याघ्रः भयाकुलचित्तो नष्टः ।
५) धूर्तः श्रृगालः हसन् – "भवान् कुतः भयात् पलायितः ?"
६) बुद्धिमती व्याघ्रजाद भयात् पुनः मुक्ता अभवत् ।
७)यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात् ।
८)बुद्धिमती चिन्तितवती– जम्बुककृतोत्साहद् व्याघ्रात् कथं मुच्यताम् ।

**प्र.१७८] अधोलिखितपदानां विलोमपदानि लिखत ।** **[4x1=4]**

| | |
|---|---|
| १) इदानीम् | २)दोषः |
| ३) पूर्वम् | ४) तत्र |

| पश्चात, तदानीम्, गोणः, अत्र |
|---|